लक्ष्यं शिक्षयामः

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। — 10

(क) भासकृते 'स्वप्नवासवदत्तमि'ति नाटके यौगन्धरायणचरित्रस्य उपयोगिता लिख्यताम्।

(ख) भासविरचितस्य 'स्वप्नवासवदत्तमि'ति नाटकस्य नामकरणस्य यौक्तिकता विशदीक्रियताम्।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – — 5

(क) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

(ख) गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाः॥

3. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। — 2×5 = 10

(क) अङ्गारवती का आसीत् ? केन सा परिणीता ?

(ख) उदयनस्य वीणायाः नाम किम् ? कस्मात् सः तां प्राप्तवान् ?

(ग) महासेनः कः आसीत् ? कथं सः महासेन इति कथितः ?

(घ) स्वप्नवासवदत्तमिति नाटकस्य भरतवाक्यं किम् ?

(ङ) कः आसीत् रुमण्वान् ? कस्य नामासीत् वसन्तकः ?

(च) न्यासः नाम कः ? केन कः न्यासरुपेण निक्षिप्तः ?

(छ) स्वप्नवासवदत्त नाटके प्रयुक्तेषु वृत्तेषु कयोश्चित् द्वयोः नामनी लिख्येताम्।

(ज) यौगन्धरायणः कः आसीत् ? स्वप्नवासवदत्तमिति नाटके मगधराजस्य नाम किम् ?

## SECTION-B

4. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। — 10

(क) शकुन्तलां प्रति दुर्वाससः शापः कः आसीत् ? अभिज्ञानशकुन्तलम्नाटकस्य क्रमविकाशे तस्य शापस्य उपयोगिता प्रदर्श्यताम्।

(ख) ''उपमा कालिदासस्य'' अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणम् इत्युक्तिः विशद्यताम्।

5. अधोलिखितेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5×3 = 15

(क) आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(ख) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ग) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रुपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

(घ) लभेत वा प्रार्थयिता न वा श्रियम्।
श्रिया दुरापः कथमीप्सितो भवेत्॥

(ङ) त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः॥

(च) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

अथवा

अधोलिखितेषु विषयत्रयमवलम्ब्य टिप्पणी लिख्यताम्। 5×3 = 15

(i) नान्दी, (ii) कुलपतिः, (iii) माधव्यः, (iv) सानुमती, (v) प्रियंवदा, (vi) कण्वशिष्यः।

——×——